# Gayatrikrita Shivamantrapraptyagrahah

# ગાયત્રીકૃતશિવમન્ત્રપ્રાપ્ત્યાગ્રહઃ

## Document Information

Text title : Gayatrikrita Shivamantrapraptyagrahah

File name : shivamantraprAptyAgrahaHgAyatrIkRRita.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 2| 33-56 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# ગાયત્રીકૃતશિવમન્ત્રપ્રાપ્ત્યાગ્રહઃ

ભગવન્ દેવદેવેશ ભર્ગ સંસારભર્જક ।
પ્રસીદ કરુણા સિન્ધો વરં દેહિ મમેપ્સિતમ્ ॥ ૧॥

મન્ત્રઃ શિવપદાભાવે જપાયોગ્ય ઇતિ શ્રુતિઃ ।
પ્રસિદ્ધા સા શ્રુતિસ્તાવત્ માન્યા ધન્યસ્ય કેવલમ્ ॥ ૨॥

મન્ત્રે શિવપદં યત્ર તેન સિદ્ધિઃ પ્રજાયતે ।
અતો મુનીશ્વરાઃ સર્વે શિવમન્ત્રજપોત્સુકાઃ ॥ ૩॥

શિવમન્ત્રે વિદ્યમાને સર્વવિદ્યાપ્રકાશકે ।
અવિદ્યાનાશકે તસ્મિન્ અન્યો મન્ત્રો ન વિદ્યતે ॥ ૪॥ (જપ્યતે, જાયતે)

વ્યર્થાયાસપ્રદા મન્ત્રાઃ શિવશબ્દવિવર્જિતાઃ ।
અતસ્તૈર્બહુધા જપ્તૈઃ અલ્પં વા ન ફલં ધ્રુવમ્ ॥ ૫॥

નીરસૈસ્તરુભિઃ પુષ્પં ન ફલં વા યથા તથા ।
શિવમન્ત્રાન્યમન્ત્રેણ પ્રજપ્તેનાપિ કિં ફલમ્ ॥ ૬॥

કિં વન્ધ્યા જરઠા પુત્રં સૂતે વિદ્યાવિશારદમ્ ।
તથા મન્ત્રાસ્તુ તે વન્ધ્યાઃ શિવનામવિવર્જિતાઃ ॥ ૭॥

શિવનામસ્વરૂપેણ દોહદેન મહેશ્વર ।
ફલં ભક્તિતરુઃ સૂતે ભક્તિસિક્તઃ પુનઃ પુનઃ ॥ ૮॥

શિવનામપ્રવેશેન મન્ત્રો ભાતિ યથા રવિઃ ।
ઉદયાચલમાસાદ્ય સહસ્રકિરણોઽપિ સન્ ॥ ૯॥

શિવમન્ત્રાભાવબદ્ધો ન ફલાયોપયુજ્યતે ।
મન્ત્રાકારં દિનં ભાનુમપેક્ષ્યાસાદ્ય ભાસતે ॥ ૧૦॥

મન્ત્રરૂપદિનસ્યાયં ભર્ગશબ્દસ્તુ ભાસ્કરઃ ।
દિનં ન ભાસ્કરાભાવે દિનત્વમપિ યાસ્યતિ ॥ ૧૧॥

યથા તથા મન્ત્રતાઽપિ મન્ત્રે તેન વિના તુ ન ।
સૃષ્ટં શિવપદં પૂર્વં ત્વયા તાવન્મહાત્મના ॥ ૧૨॥

તદ્યત્ર મન્ત્રે ન ભવેત્ સ મન્ત્રો જપ્ય એવ ન ।
કણ્ઠે મઙ્ગલસૂત્રં ચેન્ન નારી મઙ્ગલાવહા ॥ ૧૩॥

તથૈવ મન્ત્રવિદ્યાઽપિ મઙ્ગલાય ન તં વિના ।
શિવમન્ત્રસ્તુ મન્ત્રાણાં તાવન્મઙ્ગલસૂત્રવત્ ॥ ૧૪॥

જાતો મઙ્ગલદાનાય કિમન્યૈઃ સાધનૈરપિ ।
રત્નભૂષણયુક્તાપિ ન રણ્ડા ભાતિ સર્વથા ॥ ૧૫॥

વિના મઙ્ગલસૂત્રેણ તથા મન્ત્રો ન તં વિના ।
કિં તયા ક્રિયતે ધેન્વા ન દોગ્ધ્રી ન ચ ગર્ભિણી ॥ ૧૬॥

શિવમન્ત્રવિહીનેન જપ્તેન મનુનાઽપિ કિમ્ ।
યા ગૌઃ સગર્ભા સા પોષ્યા સાધનૈર્વિવિધૈસ્તથા ॥ ૧૭॥

શિવમન્ત્રેણ સંયુક્તો મનુર્જપ્યો મનીષિભિઃ ।
શિવમન્ત્રાત્મકં રત્નં મન્ત્રઃ પ્રાપ્ય વિરાજતે ॥ ૧૮॥

યથા ધરા રત્નગર્ભા ફલં સૂતે મનોહરમ્ ।
પતિવ્રતાઽપિ યા નારી પુત્રહીના ન રાજતે ॥ ૧૯॥

તથા શિવપદાભાવે મન્ત્રવિદ્યા ન રાજતે ।
મન્ત્રો મન્ત્રત્વમાપ્નોતિ શિવમન્ત્રપ્રવેશનાત્ ॥ ૨૦॥

તદભાવે સ મન્ત્રઃ સ્યાદમન્ત્રઃ કેવલઃ શિવઃ ।
મહિમા શિવશબ્દાનાં ન જ્ઞાતું શક્યતે મયા ॥ ૨૧॥

વેદૈરપિ ન વિજ્ઞાતો મુનિભિશ્ચ સુરૈરપિ ।
મન્મન્ત્રે જપયોગ્યત્વં નાસ્તીતિ મુનિભિઃ પ્રભો ॥ ૨૨॥

ન જપાય પ્રયુક્તોઽયં મનો દુઃખમિદં મમ ।
એતદ્દુઃખવિનાશસ્તુ ત્વત્પ્રસાદં વિના કથમ્ ॥ ૨૩॥

ત્વયિ પ્રસન્ને ભગવન્ અપ્રાપ્યમપિ કિં પ્રભો ।
યન્ન વેદૈરપિ જ્ઞાતં તવ રૂપં મહેશ્વર ॥ ૨૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ગાયત્રીકૃતશિવમન્ત્રપ્રાપ્ત્યાગ્રહઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨। ૩૩-૫૬ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 2. 33-56 ..

Proofread by Ruma Dewan

---

*Gayatrikrita Shivamantrapraptyagrahah*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*